# vahnisUnustavaH

# વહ્નિસૂનુસ્તવઃ

## Document Information

Text title : vahnisUnustavaH

File name : vahnisUnustavaH.itx

Category : vishhnu, krishna, puShTimArgIya, raghunAthajI

Location : doc_vishhnu

Author : raghunAthajI

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# વહ્નિસૂનુસ્તવઃ

યઃ કૃષ્ણસેવાર્થમગાધબોધં જગાદ શાસ્ત્રં ભગવત્પ્રણીતમ્ ।
નિશ્ચિત્ય તદ્ભાવમનન્યભાવં તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૧॥

યઃ પ્રાર્થિતો ભક્તજનૈઃ સમસ્તં કરોતિ કાર્યં કરુણાકટાક્ષઃ ।
ક્ષણં વિના કૃષ્ણકથાં ન ચાસ્તિ તં તહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૨॥

યો ગોકુલં ગોપપતિર્યથા પુરા પુરાણપુંસં પ્રિયમેત્ય સાદરમ્ ।
ચકાર વાસં કમલાનિવાસં તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૩॥

યો રાસલીલાકુમુદૌષધીશો ભક્તાર્થમાવિષ્કૃતગોકુલેશઃ ।
તિરસ્કૃતાનેકમહાસુરેશસ્તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૪॥

યઃ સંસ્મૃતઃ ક્લેશમશેષમસ્તં કરોતિ સુસ્થં નિજભૃત્યવર્ગમ્ ।
તદ્દુઃખવિધ્વંસકૃતોદ્યમઃ સદા તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૫॥

યઃ સર્વદાઽઽસ્તે હરિદાસવર્યે ગોગોપગોપીજનરાજિરાજિતે ।
શ ૃણ્વન્ સુગીતાનિ યશોયુતાનિ તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૬॥

યો ધર્મરક્ષાર્થમતિપ્રબુદ્ધૈર્યજ્ઞૈઃ સમીજે જનકં કૃશાનુમ્ ।
ભક્ત્યૈકકામઃ શ્રુતિતન્ત્રવિજ્ઞસ્તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૭॥

યો રાસલીલામૃતસિન્ધુવૃદ્ધિં કરોતિ પૂર્ણેન્દુગણૈસ્તુ પૂર્ણઃ ।
ભક્તેઙ્ગિતજ્ઞઃ શુભવાઞ્છિતપ્રદસ્તં વહ્નિસૂનું શરણં પ્રપદ્યે ॥ ૮॥

ઇમં સ્તવં યઃ પ્રપઠેત્ત્વદઙ્ઘ્રિધ્યાનૈકનિષ્ઠઃ શરણપ્રલિપ્સુઃ ।
તં ભાવય શ્રેષ્ઠતમં સ્વભક્તં પ્રાર્થ્યં ત્વિદં ત્વદ્રઘુનાયકસ્ય ॥ ૯॥

ઇતિ શ્રીરઘુનાથજીકૃતો વહ્નિસૂનુસ્તવઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*vahnisUnustavaH*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*